# SANSKRIT

## प्रथम प्रश्न–पत्रम्

## (नाटकं, प्राचीनकाव्यं, संस्कृतसाहित्यस्य इतिहासः)

**Time Allowed : Three Hours** **Maximum marks : 100**

1. निम्नलिखितानां श्लोकानां संदर्भसहितः अनुवादः करणीयः : $7^{1/2}+7^{1/2}$

(क) नीवाराःशुकगर्भकोटरमुख भ्रष्टास्तरूणामधःए
प्रस्निग्धाः क्वचिदिङ्गदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा– ,
स्तोयाधारपथाश्च वल्कलशिनिष्यन्द रेखांङ्किताः।।

अथवा

अध्याक्रानता वसतिरमुनाऽप्याश्रमें सर्वाभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति।
अस्यापि द्यां स्पृशति वशिनरचारण द्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः।

(ख) स्वसुखनिरभिलाषः शिवद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्।

http://questionpaperesult.com/

Scanned by CamScanner

अथवा

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम्।
किं वाऽभविष्यदरूणस्तमसां विभेत्ता
तं चेत् सहस्त्रकिरणो धुरि नाकरिष्यत्।

2. अद्योलिखीतानां श्लोकानां संदर्भसहिता व्याख्या करणीया– 10+10

(क) चित्रे निवेश्च परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः।

अथवा

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठ्या
कण्ठः स्तम्भिवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तादीशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेष दुःखे नवैः।

(ख) स्त्रीणमशिक्षितपटुत्वममानुषीषु
संदुश्चते मित याः प्रतिबोधवत्यः
प्रागन्तरिक्षगमनात् स्वमपत्यजात–
मन्यै द्विजैः परभूताः खेलु पोषयन्ति

अथवा

साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहुमन्यमानः।
स्त्रोतोवहां पथि निकामजलाम तीत्य
जातः सखे प्रणयवान्मृग तृष्णिकायाम्।।

3. अभिज्ञानशाकन्तुलमधिकृत्स केषाञ्चित् पञ्च प्रश्नानां संस्कृतभाषायाम् उतरं देयम्– 5x2=10

(1) 'अभिज्ञान शाकुन्तलम्' इति नाटकस्य मूस्रेतः कः अस्ति?
(2) दुर्वासाऋषेः शापस्य घटना कस्मिन् अङ्के वर्तते?
(3) 'अभिज्ञान शाकुन्तलम्' इति नाटके विदूषकस्य किं नाम अस्ति?
(4) शकुन्तलायाः सखिद्वयस्य नाम्नौ लिखतु।
(5) पतिगृहगमनावसरे शकुन्तलया सह के गतवन्तः?
(6) ऋषिकण्ठः सोमतीर्थं केन कारणेन गतवान्?
(7) कस्य अलंकारस्य कृति कालिदासः प्रसिद्ध?
(8) कालिदासस्य कति नाटकानि सन्ति? नामानि लिखतु।

4. अधोलिखीतानां छन्दसां केषाञ्चित् त्रयानां लक्षणमुदाहरणं लक्षणसाङ्गतिं च विवेचनीयम्– 3x5=15

(1) उपजाति
(2) द्रुतविलम्बित
(3) वसन्ततिलका
(4) शार्दूलविक्रीडित

http://questionpaperesult.com/

Scanned by CamScanner

(5) शिखरिणी (6) स्रग्धरा

5. 'येदहास्ति तत् सर्वत्र यन्नेहास्ति न तत् क्वचित्' इमां सूक्तिं विवेचयतु। 10

**अथवा**

'बाणोच्छिष्टं जगत्सर्वम्' इमां सूक्तिं विवेचयतु।

6. अधोलिखीतेषु कयोः दयोः टिप्पणी लिखतु– 5+5=10

(1) किरातार्जुनीयम्। (2) उत्तररामचरितम्

(3) हितोपदेशः (4) मेघदूतम्

7. केषाञ्चित् पञ्च प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 5x2=10

(1) रामायणे कति काण्डानि सन्ति?

(2) 'शिशुपालवध' इति महाकाव्यस्य रचयिता कः अस्ति?

(3) 'गीत गोविन्द' इति गीतिकाव्यस्य रचियता कः अस्ति?

(4) महाकवेः भृर्तहरेः शतकत्रयस्य नामानि लिखन्तु।

(5) 'दशकुमारचरितम्' कस्य कृतिः अस्ति?

(6) अभिनवबाणः कोऽस्ति।

(7) 'मृच्छकटिकम्' कस्य रचना अस्ति?

(8) आदिनाटककारः कोऽस्ति?

8. केषाञ्चित् पञ्च पदानां प्रकृतिप्रत्ययौ लिखनीयौ– 5x2=10

(1) रक्षिता (2) परीक्ष्य

(3) श्रोतव्यम् (4) मन्यमानः

(5) स्थिति (6) अवरोधः

(7) अध्यासितुम् (8) परिसमाप्तम्

http://questionpaperesult.com/

Scanned by CamScanner